International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(2): 23-25
© 2024 IJMH
www.themultijournal.com
Received: 22-06-2024
Accepted: 28-06-2024
Publish : 29-06-2024

**डॉ. पारमिता पण्डा**
उपाचार्या, पुराणेतिहास विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डॉ. पारमिता पण्डा**
उपाचार्या, पुराणेतिहास विभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पुराणेषु इतिहासस्य वैशीष्टयम्

**डॉ. पारमिता पण्डा**

**भूमिका :-**

**यो ब्रह्माणं विदधाति पूर्वं**
**यो वै वेदांश्च प्रहिणोति तस्मै।**
**तं ह देवमात्मबुद्धिप्रकाशं**
**मुमुक्षुर्वै शरणमहं प्रपद्ये ।।'**[1]

वेदाः, वेदाङ्गानि, उपनिषदः इति सर्वे वैदिकग्रन्थाः वेदवाङ्मयरूपेण ग्राह्याः यद्यपि आधुनिकाः वेदस्य कालनिर्णयं कर्तुं कृतयत्नाः। ऋग्वेदः अस्मिन्काले रचितः, मण्डलमिदं प्राचीनं, दशममर्वाचः इत्यादि कल्पयन्ति। तथापि भारतीयविद्वांसाः वेदानाम् अनादित्वम् अपौरुषेयत्वं च अङ्गीकुर्वन्ति। वेदाश्च अनन्ताः अपि प्रतिद्वापरं नारायणावतारेण वेदव्यासेन चतुर्धा विभक्ताः भवन्ति। एवं विभक्तोऽपि वेदः भिन्नभाषामयत्वात् सुलभतया अवगन्तं न शक्यः। अपि च वेदबोधितः अर्थः सर्वोऽपि प्रभोः आज्ञा इव लिङ् लोट् कृत्यप्रत्ययैः निर्दिष्टो भवति। अतः वेदवाङ्गयं प्रभुसम्मितं गद्यते।

वेदाश्च सर्वैः अध्येतुम् अयोग्याः इति कैः अपि कारणैः स्मृतिभिः निर्दिष्टाः। तेषां वेदार्थावगमनाय पुराणेतिहासाः वेदव्यासेन ग्रन्थिताः। तेऽपि अष्टादशपुराणानि चतुर्लक्षश्लोकात्मकानि, महाभारत-मितिहासः लक्षश्लोकात्मकः पुनस्तेषां संग्रहाय उपपुराणानि औपपुराणानि, उपौपपुराणानि अपि प्रमाणेन न्यूनीकृतानि वेदव्यासेनेच विरचितानि। अपि च पुराणानि वेदार्थबोधकान्यपि भवन्ति । तदुक्तं-

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**विभेत्यल्पश्रुताद्वेदः मामयं प्रहरिष्यति।।** - म.भा.आ.प.,४/१५

पुराणानि सहृदः इव उपदिष्यन्ति। तस्य अनुष्ठाने आचरितुः स्वातन्त्र्यं भवति। अतः पुराणं मित्रसम्मितं कथयन्ति। तृतीयं कान्तासम्मितं काव्यमपि परिगणितम्। किन्तु *'काव्यालापांश्च वर्जयेत् इति निषेधश्रुतेः पुराणं पवित्रोपदेशरूपम् इति अकुर्वन्ति।

**इतिहासपुराणयोः भेदः-**

इतिहासः पुरावृत्तमिति । इतिहासशब्दः प्राचीनकथाबोधकः। पुराणशब्दः स्वयं प्राचीनार्थकः। पुराणशब्दार्थाः व्युत्पत्तैश्च दशाधिकाः शास्त्रपुराणेषु दृश्यन्ते। पुरति अग्रे गच्छतीति पुराणम्। पूरणात् पुराणम्। पुरा प्रणिति पुराणम्। पुरा अनति जीवन्निति पुराणम्। पुरा अणिति कथयतीति पुराणम् इति बहवः पुराणशब्दाः निरूपिताः।

इतिहासशब्दोऽपि प्राचीनार्थकः। एवम् इतिहासपुराणयोः अभिन्नरूपयोः कथं भेदेन व्यवहारः इति विचार्य यास्काचार्यादयः पुराणेतिहासयोः भेदमेवं निरूपितवन्तः। पुराणसाहित्येतिहासेन सहास्ति घनिष्ठसम्बन्धः प्राचीनग्रन्थेषु द्वयोर्नाम सम्मिलित-रूपेणोपलभ्यते। पुराणेतिहासयोः व्युत्पत्तिविषयेऽपि साम्यं दृश्यते। स्कान्दपुराणे 'यल्लोकगौरवादितिहासपुराणं भिन्न भिन्नं वर्तते इतिहासपुराणानि भिद्यन्ते लोकगौरवात् इति लिखितमस्ति।

विश्वस्मिन् संस्कृतवाङ्गये महाभारतं एकः एव इतिहासरूपेण गण्यते। श्रीमद्रामायणे एकनायकेऽपि इतिहासलक्षणानि समन्वितानि भवन्ति।

तथापि तदादिकाव्यं प्रसिद्धम्। महाभारते आदिपर्वणि, भीष्मपर्वणि, शान्तिपर्वणि, आनुशासिकपर्वणि च भक्तेः तत्त्वं विस्तरेण वर्णितम्।

**पुराणमितिहासश्च**

पुराणसाहित्यस्येतिहासेन सहास्ति घनिष्ठः सम्बन्धः। प्राचीनग्रन्थेषु द्वयोर्नाम सम्मिलितरूपेणोपलभ्यते। छान्दोग्योपनिषदि इयं कथास्ति यत्-एकदा यदा देवर्षिर्नारदो ब्रह्मविद्यामध्येतुं सनत्कुमारपार्श्वे उपस्थितस्तदा तेन पृष्ठो यद् भवता इतः पूर्वं किं किमधीतमस्ति ? तदुत्तरे स स्वाधीतविद्यासु इतिहासपुराणयोर्नाम गृहीत्वा तत् पञ्चमं इदं प्रावोचत्-

**ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमप्यथर्वाणमितिहासपुराणं पञ्चमं वेदानां वेदम्।**

न्यायभाष्ये वात्सायनेनापि विषयभेदात् साहित्यस्य त्रयो भेदाः स्वीकृताः सन्ति। (१) यज्ञः, (२) लोकचरितम्, (३) व्यवहार-व्यवस्थापनं च। एषु यज्ञो मन्त्रब्राह्मणात्मकस्थ वेदस्य विषयः। लोकचरितमितिहासपुराणस्य विषयः। तथा व्यवहारव्यवस्थापनम्, मानवानां पुण्यपापादीनां निर्धारणञ्च धर्मशास्त्रस्यास्ति विषयः।

वस्तुतो द्रष्टुः प्रवक्तुश्च दृष्ट्या एषु भेदो नास्ति, यतो हि ये ऋषयो मन्त्राणां द्रष्टारः सन्ति, त एव इतिहासपुराणस्य धर्मशास्त्रस्य च द्रष्टारो वक्तारश्च सन्ति। किन्तु एषु विषयविवेचनदृष्ट्या पार्थक्यं स्वीक्रियते।

यास्काचार्येण स्वनिरुक्ते पुराणेतिहासयोर्निरुक्तिः कृताऽस्ति यत् पुरा नवं भवति पुराणम् तथा इतिहासस्य व्युत्पत्तिः इति+ह+आस इतिहासः (इति एवं प्रकारम्, ह-निश्चयरूपेण आस वर्तमानमासीत्) एवं पुराणशब्दस्यार्थो भवति यत् प्राचीनं सदपि नवीनं स्यात् तत् पुराणम् तथा इतिहासस्यार्थो भवति यः प्राचीने काले वास्तविकरूपेण घटितघटनायाः सङ्केतं करोति स भवतीतिहासः। दुर्गाचार्योऽपि निरुक्तवृत्तौ निदानभूतः 'इति हासवमासीत्' इति य उच्यते स इतिहासः ।

स्वामिशङ्कराचार्येण स्वकीये छान्दोग्योपनिषद्भाष्ये उर्वशी हाप्सराः पुरुरवर्स चकमे (११/५/१/१)। इति शतपथब्राह्मणाधारेण उर्वशीपुरुरवसोः संवादसूचकोंऽश इतिहासो मन्यते-उसद्वा इदमग्र आसीत् इत्यनुसारं सृष्टिप्रक्रियाघटितविवरणं पुराणं प्रोच्यते। इतिहासः, इत्युर्वशीपुरुरवसोः संवादादिः, उर्वशी अप्सरा इत्यपि ब्राह्मणमेव। पुराणम् असद्धा इदमग्र आसीत्, इत्यादि (छा.उ.शां. भा., ७/१)। एवं शङ्कराचार्यमते प्राचीनाख्यानोपाख्यानसूचको भाग इतिहासोऽस्ति तथा सृष्टिप्रक्रियाया वर्णनं पुराणं विद्यते। किन्तु सायणाचार्येण स्वकीये शतपथब्राह्मणभाष्ये एतद्विपरीतं सृष्टिप्रक्रिया-प्रतिपादको ब्राह्मणभाग इतिहासः तथा उर्वशीपुरुर-वसोराख्यानं पुराणं प्रोक्तं वर्तते आपो ह वा इदमग्रे सलिलमेवासु इत्यादि सृष्टिप्रतिपादकं ब्राह्मणमितिहासः। उर्वशीहाप्सारा पुरुर-वसमैडं चकमे इत्यादीनि पुरातनपुरुषवृत्तान्तप्र-तिपादकानि पुराणम्।

**शुक्रनीत्यादावितिहासपुराणयोर्लक्षणमित्थं कृतं विद्यते-**
**प्राग्वृत्तकथनं चैकराज्यकृत्यमिषादितः ।**
**यस्मिन् स इतिहासः स्यात् पुरावृत्तं स एव हि।।**
**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं यस्मिन् पुराणं तद्धि कीर्तितम् ।।**[2]
**धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।**
**पूर्ववृत्तं कथायुक्तमितिहासं प्रचक्षते ।।**[3]
**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।।**[4]

स्कन्दपुराणे लिखितमस्ति यल्लोकगौरवादितिहासपुराणं भिन्नं भिन्नं वर्तते-इतिहासपुराणानि भिद्यन्ते लोकगौरवात्।

यद्यपि आलोचकाः केवलं महाभारतमेवेतिहासं ध्रुवन्ति तथा रामायणं महाकाव्यं कथयन्ति, यतो हि स्वयं महाभारते महाभारतमितिहासनाम्नाभिहितमस्ति। देवीभागवतेऽपि कर्तुः श्लोकसंख्यायाथोल्लेखपूर्वकं महाभारतमितिहासः इति प्रोक्तोऽस्ति ।

तथा वाल्मीकीये रामायणे प्रतिसर्गं पुष्पिकासु-इत्यार्षे वाल्मीकीये महाकाव्ये अमुकः सर्ग इत्युल्लिखितोऽस्ति । तथा ब्रह्मवैवर्तपुराणे-

**तपसा ब्रह्मचर्येण यस्य वेदं सनातनम्।**
**इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ।।**[5]
**जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा।**[6]
**इतिहासोत्तमादस्माज् जायन्ते कविबुद्धयः।**[7]
**भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः।"**[8]
**सपादलक्षं च तथा भारतं मुनिना कृतम्।**
**इतिहास इति प्रोक्तं पञ्चमं वेदसम्मितम् ।।**[9]

अस्य समर्थनं कुर्वत् सिद्धान्तयति यद् महाभारतमितिहासोऽस्ति वाल्मीकीयरामायणञ्च महाकाव्यमस्ति ।

तथापि संस्कृतसाहित्यपरम्परायां रामायणमहाभारतयोरुभयोरे-वेतिहासनाम्ना ख्याति-रस्ति। अत एव राजशेखरेण द्वयोः सङ्ग्रहदृष्ट्या स्वकाव्यमीमांसायामितिहासो द्विप्रकारकोऽभिमतो-ऽस्ति। (१) एकनायिककथा-यथा रामायणम्, (२) पुराकल्पः बहुनायिका कथा यथा महाभारतम्।

अतो रामायणमितिहासान्तर्गतमिति स्वीकारः, प्राचीनशास्त्रीय-मर्यादानुकूलमेवास्ति। तथा च वाल्मीकीयं रामायणं वैयासिकं महाभारतञ्चेति द्वे अपि इतिहासाख्यया प्रसिद्धे स्त इति निर्विवादम्। यथा-पुराणं सर्ग-पतिसर्ग-वंश-मन्वन्तर वंशानुचरितैरेभिः पञ्चभिः विषयैः सह दान-व्रत-तीर्थ-धर्म-भक्त्यवतारादीनामपि पर्याप्तं वर्णनं करोति। तथैव इतिहासोऽपि न केवलं प्राचीनानां घटनानामेव वर्णनं

करोति, प्रत्युत विभिन्नव्यावहारिक-विषयाणामपि शिक्षां प्रदाय मानवहृदयेभ्यो मोहान्धकारमपि निवारयति, यस्य सङ्केतो महाभारते कृतमस्ति।

एवं संस्कृतसाहित्यस्येतिहासो यद्यपि प्राचीनानामाख्यानानां वर्णनं करोति तथापि आधुनिकेतिहासवत् तस्य क्षेत्रं सीमितं नास्ति, किन्तु विविधविषयकलोकव्यवहारशिक्षां प्रदाय मानवहृदयेभ्योऽज्ञाना-वरणमपसार्य एकस्या अभिनवचेतनाया अपि प्रकाशं प्रददाति। एवमितिहासपुराणयोर्विषयभेदेऽपि वायुपुराणमात्मानं पुरातन-मितिहासं कथयति तथा महाभारतमितिहासः सद्यपि आत्मानं पुराणं प्रख्यापयति।

**सन्दर्भग्रन्थसूची –**

1.श्रीभागवतं श्रीधरीयव्याख्या

2.मत्स्यपुराणम्

3.शुक्रनीतिः

4.सस्कृतवाङ्गये वाल्मीकिरामायणम्

5. महाभारतम् सभापर्व

6. महाभारतम् आदिपर्व

**पाद टिप्पणी –**

1. श्री.भा.श्री.व्या., १-१-१

2. शु.नी., ४/९२-३

3. सं.वा.रा........१२

4. म.पु.,५३/६४

5. आ.प.,१/५४

6. स्व.प्र.,५/५१

7. आ.प.,२/३८५

8. आ.प.,२/४१

9. दे.भा., १/२/२६